This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

सं० ग्रं० ॥श्रीशिवायनमः॥श्रीनीलग्रीवायनमः॥श्रीसतीपतयेनमः॥ चिं०

॥१॥ श्रीलक्ष्मीसहायायग्रहग्रस्तमायातिदुःखज्वलत्कुत्सितग्रहयानिग्रहीतं
द्विजायभक्तजनायरक्तेपीतानिरस्तायग्रहतर्पणीकृतभालिरक्तो
ज्वलत्स्यामलमूरुराक्तेफलस्तनत्रस्तश्रीसंज्ञायस्वस्तिकरः
शानिग्रहेभ्योभयदानमः॥श्रीशिवायनमोनमः॥

१ग्रन्थ ॥अथब्रह्मचिंतनिकाप्रारंभसंग्रह॥
२निर्वाघ्नार्थ ॥कर्मादिसंग्रहप्रारंभः॥श्रीप्रभं॥
३गुणाः २अथपुरुषनिःश्रेयसप्रयोजनिरूपणं
४पुरुषः ३अनन्तरा
५कर्माणि ४साधनचतुष्टयं
६क्रियाः ५कोशपञ्चकेनिर्दिश्यात्मानात्मविवेचनं
७अवयवः ६शमादिषट्कं
७श्लोकाः

पाहिजे ✓

पु०२५

K.K.S.U. LIBRARY
RAMTEK
441106
M-1503
Dist. Nagpur

Acc. NO. ~~973~~ M.1503
Title - ब्रह्मचिन्तनिका.
~~Author~~ - ?
Date - ?
Sub - वेदान्त.
folio - 17
Xerox - 34

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥अथब्रह्मचिंतनि
॥१॥ कापारंभः॥अहंब्रह्मास्मीत्यनुभवएवंवदतिशि
ष्यः॥अहमेवपरंब्रह्मवासुदेवाख्यमव्ययं॥इतिस्था
प्रितोमुक्तोबद्धएवान्यथाभवेत्॥१॥अहमेव
परंब्रह्मनचाहंब्रह्मणःपृथक्॥इत्येवंसमुपासीत
ब्रह्मवित्ब्रह्मणिस्थितः॥२॥अहमेवपरंब्रह्मनि
श्चितंचिन्मचिंतितं॥चिद्रूपत्वादसंगत्वाद्बाध
त्वात्प्रयत्नतः॥३॥सर्वोपाधिविनिर्मुक्तचैत
न्यंचनिरंतरं॥तद्ब्रह्मास्मीतिविज्ञाय कथंवर्णाश्र ॥१॥
मीभवेत्॥४॥अहंब्रह्मास्मियोवेदसर्वंभव

त्ति त्वि दं॥ ना ऽ स्या ई शा ते दे वा स्त स्या त्मै वा भ वे द्वि॥
सः॥ ५॥ अ न्यो सा व ह म न्यो स्मी त्यु पा स्ते यो न्य दे वं॥
तां॥ न स वे द पर ब्रह्म स दे वा नां य था प शुः॥ ६॥ अ
ह मा त्मा न् चा न्यो स्मि ब्रह्मै वा हं न शो क भा क्॥ स च्चि
दा नं द रू पो हं नि त्य मु क्त स्व भा व वा न्॥ ७॥ आ त्मा नं
स त तं ब्रह्म सं भा व्य वि ह रं ति ये॥ न ते षां दु ष्कृ तं कि
चि दु ष्कृ तो त्था न चा प दः॥ ८॥ आ त्मा नं स त तं ब्रह्म
स भा व्य वि ह रे त्सु खं॥ क्ष णं ब्रह्मा ह म स्मी ति यः॥
कु र्या दा त्म चिं त नं॥ ९॥ न न्म हा पा त कं हं ति त मः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ सूर्योदयो यथा॥अस्तानाद्भूत्नणोऽस्तानुमाकाशंबुद्बु
दोपमं॥१०॥आकाशगङ्गा धुरत्वंभोवायोस्तेजस्ततः
पयः॥अभ्रश्चपृथिवीसातातेनोव्रीहियवादिकं॥
॥११॥पृथिव्यसुपयोवह्नोवह्निर्वायोनभस्यसौ
॥नभोप्यव्याकृतेतच्चशुद्धेशुद्धोस्म्यहंहरिः॥१२॥
अहंविष्णुरहंविष्णुरहंविष्णुरहंहरिः॥कर्तृभो॥
क्तृादिकंसर्वंतद्विद्योत्थमेवच॥१३॥अच्युतो॥
हमनंतोहंगोविंदोहमहंहरिः॥आनंदोहमशोषोह
मजोहममृतोस्म्यहं॥१४॥नित्योहंनिर्विकल्पो॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हं निराकारोहमव्ययः॥सच्चिदानंदरूपोहं पंचकोशा॥
तिगोस्म्यहं॥१५॥अकर्ताहमभोक्ताहमसंगःपरेश्व॥
रः॥सदासन्निधानेनचेष्टतेसर्वमिंद्रियं॥१६॥आ
दिमध्यांतमुक्तोहंनवद्धोहंकदाचन॥स्वभावनिर्मलः
शुद्धःसएवाहंनसंशयः॥१७॥ब्रह्मैवाहंनसंसारीमुक्तो
हमितिभावयेत्॥अशक्तेवंनभावयितुंवाक्यमेतत्स
दाभ्यसेत्॥१८॥यद्वाभ्यासेनतद्भावोभवेद्भ्रमरकीट
वत्॥अत्रोपायसंदेहमभ्यसेत्तुनिश्चयः॥१९॥ध्या
नयोगेनमासैकाद्बलहत्यांव्यपोहति॥संवत्सरक्र॥
ताभ्यासात्सिध्यष्टकंमवाप्नुयात्॥२०॥यावज्जीवंस॥

॥३॥ दात्मासाजीवन्मुक्तोभवेद्यतिः॥नाहंदेहोनचप्राणो
नेंद्रियाणितथैवच॥२१॥नमनोहंनबुद्धिश्चना
हंचित्तमहंकृतिः॥नाहंपृथ्वीनसलिलंनचवह्निः॥
स्तथानिलः॥२२॥नचाकाशोनशब्दश्चनचस्पर्शं
स्तथारसः॥नाहंगंधोनरूपंचनमायाहंतुसंस्तु
तिः॥२३॥सदासाक्षीस्वरूपोऽहंशिवएवास्मिकेव
लः॥मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितं॥२४॥ ॥३॥
मयिसर्वंलयंयातितद्ब्रह्माद्वयमस्म्यहं॥सर्वज्ञो
हमनंतोहंसर्वेशःसर्वशक्तिमान्॥२५॥अनंदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यबोधोहमिति ब्रह्मानुचिंतनं॥अयंप्रपंचोमि
थ्यैवसत्यंब्रह्मानुचिंतनंमहमद्वयं॥२६॥अत्रप्रमा
णंवेदांताउरबोनुभववस्तथा॥ब्रह्मैवाहंनसंसारीन॥
चाहंब्रह्मणःपृथक्॥२७॥नाहंदेहोनमेदेहःके॥
लोहंसनातनःशुद्धकमेवाद्वितीयंब्रह्मनेहनानास्ति
किंचनेतिश्रुतेः॥२८॥ ॥इतीश्रीमच्छंकराचा
र्यविरचितब्रह्मचैतन्यनिकासमाप्तः॥श्रीकृष्णा
र्पणमस्तु॥ ॥श्रीरस्तुनमोः॥ओंकारःसर्ववेदा
नांसारस्तत्त्वप्रकाशकः॥तेनचित्तसमाधानंसुखं॥
क्षणाप्रकाश्यतेऽआसीदेकंपरब्रह्मनित्यमुक्तं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥

मविक्रियं॥तस्य माया समावेशा द्वीजमव्याकृतात्म
कं॥२॥तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकं॥स्प॥
र्शात्मकस्ततो वायु स्तोजो रूपात्मकं ततः॥३॥आपो र
सात्मिकास्तस्मान्नाभोगंधात्मिका मही॥शब्दैकगुण
माकाशं शब्दस्पर्शौगुणौमरुत्॥४॥शब्दस्पर्शरूप॥
गुणैस्त्रिगुणंतेजउच्यते॥शब्दस्पर्शरूपरसगुणे
रापश्चतुर्गुणाः॥५॥शब्दस्पर्शरूपरसगंधैःपंचगु॥ स
णा महीगतेभ्यः भ्यः समभवत्सर्वलिंगंसवैराजकं ॥७॥
मरुत्॥६॥ततःस्थूलानिभूतानिपंचतेभ्योविरा
डभूत्॥गपंचीकृतानिभूतानिस्थूलानीत्युच्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुधैः॥७॥एथिव्यादीनिभूतानिप्रत्येकंविभजेद्धीधा
॥एकैकंभागमादायचतुर्धाविभजेत्पुनः॥८॥एकै
कंभागमेकस्मिन्भूतेसंवेश्यतत्कृतात्॥ततश्चा
काशभूतस्यभागाःपंचभवंतिहि॥९॥व्याख्या॥
दिभागाश्चत्वारोव्यादिष्वेवमादिशेत्॥पंची
करणमेतत्स्यादित्याहुस्तत्त्ववेदिनः॥१०॥पंचीकृ
तानिभूतानितत्कार्यंचविराट्भवेत्॥स्थूलश
रीरमेतत्स्याद्दशरीरस्यचात्मनः॥११॥अधिदैव॥
मथाध्यात्ममधिभूतमितित्रिधा॥एकैकंब्रह्मवि
भागेनभूतमाश्रितंनतत्वतः॥१२॥इंद्रियेरर्थवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ ग

ज्ञानंदेवतानुग्रहान्वितैः॥ज्ञा व्हादिविषयंज्ञानंत
जागरितमुच्यते॥१३॥श्रोत्रमेध्यात्ममित्युक्तं॥
श्रोतव्यंशब्दलक्षणं॥अधिभूतंतदित्युक्तं दिशा
स्तत्राधिदैवतं॥१४॥त्वध्यात्ममितिप्रोक्तंस्पृष्टव्यं
स्पर्शलक्षणं॥अधिभूतंतदित्युक्तं वायुस्तत्राधिदै
वतं॥१५॥चक्षुरध्यात्ममित्युक्तं द्रष्टव्यंरूपलक्ष॥
णं॥अधिभूतंतदित्युक्तमादित्योत्राधिदैवतं॥
॥१६॥जिव्हाध्यात्मंतथास्वाद्यमधिभूतंरसात्मि
कं॥वरुणोदेवतातत्रजिव्हायामधिदैवतं॥१७॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्राण मध्यात्मधिष्ण्यं घ्रातव्यं गंधलक्षणं॥अ॥
धिभूतं तदिष्ट्यं क्तं पृथिव्यत्राधिदैवतं॥१८॥वा
ग्भ्यां मिति श्रोत्रं वक्तव्यं शब्दलक्षणं॥अ॥
धिभूतं तदिष्ट्यं क्तमग्निस्त्वाधिदैवतं॥१९॥ह॥
स्तावध्यात्ममिष्ट्यं क्तमादातव्यं चयद्वेत्॥अधि
भूतं तदिष्ट्यं क्तमिंद्रस्त्वाधिदैवतं॥२०॥पादावा
ध्यात्ममिष्ट्यं क्तं गंतव्यं तत्र यद्भवेत्॥अधिभूतं॥
तदिष्ट्यं क्तं विष्णुस्त्वाधिदैवतं॥२१॥पायुरध्या॥
त्ममिष्ट्यं क्तं विसर्गस्तत्र योभवेत्॥अधिभूतं तं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥ दित्यक्तं शिरस्कमत्राधिदैवतं॥२२॥उपस्थेंद्रि
यमध्यात्मस्त्रियाधानेदकारणं॥अधिभूततं॥
दित्यक्तमधिदैवंप्रजापतिः॥२३॥मनोध्यात्म
मित्युक्तमंतव्यंतत्रयदुवेतं॥अधिभूततंतदि॥
त्यक्तंबुद्ध्यंतत्रयाधिदैवतं॥२४॥बुधिरध्यात्ममि
त्युक्तंबोद्धव्यंतत्रयदुवेतं॥अधिभूततदित्यक्तं
मधिदैवंरुद्रस्तिः॥२५॥अहंकारस्तथाध्या॥
त्ममहंकर्तव्यमेवच॥अधिभूततंतदित्यक्तंरुद्रस्त
त्राधिदैवतं॥२६॥चित्तमध्यात्ममित्युक्तंचेतव्यं॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्रयमेवेत्यधिभूतंतदित्यृक्कं श्रोत्राधिदैवं
तं॥२७॥तन्मोध्यात्ममितिप्रोक्तं विकारस्तत्रयोभ
वेत्॥अधिभूतंतदित्यृक्कमीश्वरोधिदैवतं॥
॥२८॥बाह्यांतःकरणैरेवंदेवतानुग्रहान्वितैः॥
स्वंस्वंचविषयंस्वानंतज्ञागरितमुच्यते॥२९॥ये
यंजागरितावस्थाशरीरंकरणाश्रयं॥यस्तयोर
भिमानीस्याद्विश्वइत्यभिधीयते॥३०॥विश्वंवैरा
जरूपंपश्येदृग्निरन्तये॥ज्ञानेंद्रियाणिपंचैव
पंचकर्मेंद्रियाणिच॥३१॥श्रोत्रत्वग्नयनघ्राणजि
ह्रादिंद्रियपंचकं॥वाक्पाणिपादपायूपस्थाःकर्म॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥ न्द्रियपंचकं ॥२२॥ मनोबुद्धिरहंकारश्चित्तं चेति च ॥
तुष्टयः ॥ संकल्पात्मकं मनोरूपं बुद्धिर्निश्चयरूपिणी
॥२३॥ अभिमानात्मकस्तद्वहंकारः प्रकीर्तिताः ॥ अनु
संधानरूपं चेच्चित्तमित्यभिधीयते ॥२४॥ प्राणोपानः
समाव्यानउदानाख्यस्तथैव च ॥ समानश्चेतिपंचैताः ॥
कीर्तिताः प्राणरत्नयः ॥२५॥ खवाय्वग्न्यम्बुक्षितयो ॥
भूतसूक्ष्माणिपंच च ॥ अविद्याकामकर्माणि लिंगपुर्य
ष्टकं विदुः ॥२६॥ एतत्सूक्ष्मशरीरस्यात्मार्थिकं प्रत्य ॥
गात्मनः ॥ करणोपरमेजाग्रत्संस्कारोत्थभोधवत् ॥ ॥
॥२७॥ ग्राह्यग्राहकरूपेणस्फुरणंस्वप्नउच्यते ॥ ओम् ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानीतयोर्यस्तु तैजसः परिकीर्तितः॥३८॥ हिरण्यग
र्भरूपेण तेजसं चिंतयेद्बुधः॥ चेतस्याभ्यासयेच्चित
शरीरद्वयकारणं॥३९॥ आत्मा ज्ञानेनदाव्यक्तमया
कृतभितीर्यते॥ नसन्नासंश्चसदसन्नाभिन्नाभिन्नं॥
नचास्तनः॥४०॥ नसभागंननिर्भागंनचाप्युभय॥
रूपकं॥ ब्रह्मासेकृतविज्ञानहेयमिथ्याचकार
णात्॥४१॥ ज्ञानात्तुपरसंहारोबुद्धेः कारणतास्थि
तिः॥ वटबीजेवटस्यैवसर्वमिरभिधीयते॥४२॥अ॥
भिमानीतयोर्यस्तु प्राज्ञइत्यभिधीयते॥ जगत्कारण
रूपेणप्राज्ञात्मानंविचिंतयेत्॥४३॥ विश्वतैजससो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ षुप्तविराट्सूत्राक्षरात्मभिः॥ विभिन्नमिवसंहादेकंत
त्वंचिदात्मकं॥४४॥विश्वादिकंत्रयंतस्माद्धैराजादि
त्रयात्मकं॥एकत्वेनैवसंपश्येदन्याभावमसिद्धये॥४५
॥ओंकारमात्रमखिलंविश्वमाद्यादितुर्यकं॥वाच्य
वाचकताभेदाद्वैतेनानुपलक्षितः॥४६॥अकार॥
मात्रविश्वःस्यादुकारस्तैजसःस्मृतः॥प्राज्ञोमका
रइतिवंपरिपश्येत्तत्क्रमेण तु॥४७॥समाधिकाला॥
नुगोवंविचिंत्यातिप्रयत्नतः॥स्थूलसूक्ष्मक्रमात्स ॥८॥
र्वंचिदात्मनिविलापयेत्॥४८॥अकारेपुरुषंविश्वमु॥
कारेप्रविलापयेत्॥उकारंतैजसंसूक्ष्मंमकारेप्रवि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लापयेत्॥४९॥मकारंकारणं त्यक्त्वं चिदात्मनि विलापयेत्॥ चिदात्मा हि नित्यशुद्धबुद्धमुक्तःसदद्वयः॥५०॥परमानंदःसदाहंवासुदेवोहमेवास्मि॥ इत्यात्मविचारेचित्ततत्साक्षिणि विलापयेत्॥५१॥ चिदात्मनि विलीनंचेत्तच्चित्तंनैवचालयेत्॥पूर्णबोधात्मनास्थित्वापूर्णाचलसद्व्रत॥५२॥एवंसमाहितोयोगीश्रद्धाभक्तिसमन्वितः॥जितेंद्रियोजितक्रोधःपश्येदात्मानमव्ययं॥५३॥आदिमध्यावसानेषुदुःखमेवमिदंयतः॥तस्मात्सर्वपरित्यज्यतत्त्वनिष्ठोभवेत्सदा॥५४॥यःपश्येत्सर्वगंशांतमानंदात्मानमव्ययं॥नतेनकिंचिदातव्यंज्ञातव्यंवाविशे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ष्यते॥५५॥ ऋतंभरात्मतो विद्वान् जीवन्मुक्तोऽस्त्यसौ
भवेत्सदा॥ कदाचिच्छ्रवणादेर्तु हेतं यद्यपि पश्यति॥
॥५६॥ नो धात्मव्यतिरेकेण निपश्यति चिदन्वयात्
॥ किंतु पश्यति मिथ्येव दृश्यात्हं तु विनागवत्॥
॥५७॥ प्रतिभासः शरीरस्य तद्वः प्रारब्धसक्षयात्
॥ तस्य तावदेव चिरमित्याहुश्रुतिरब्रवीत्॥५८॥
॥ प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः॥स
॥र्वदामुक्तएवस्यात्तत्वतः पुमानसौ॥५९॥ प्रा
॥रब्धभोगश्चेषस्यसंक्षयेनतदंतरं॥अविद्या
॥निर्मिरातीतंसर्वाभासविवर्जितं॥६०॥आनंदम
लमशुद्धमनोवाचामगोचरं॥वाच्यवाचकयो॥ ॥९॥

चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तं हेयोपादेयवर्जितं ॥ ६१ ॥ प्रज्ञानघन मानंदं
ब्रह्मेत्यवपद्यते ॥ इदं मकरणं यत्नाज्ज्ञातव्यं भ
गवन्नमैः ॥ ६२ ॥ अमानित्वादि नियमैर्गुरुभक्ति
प्रसादतः ॥ इमां विधाप्रयत्नेन योगी संध्यासु स
र्वदा ॥ ६३ ॥ समभ्यसेदिहामुत्र भोगानासक्त धीः ॥
सुधीः ॥ रागद्वेषादिरहितं स्वात्मानं चिंतयेत्सदा ॥
॥ ६४ ॥ इति सुरेश्वराचार्यकृत पंचीकरणवार्तिकं
संपूर्णं ॥ श्रीसद्गुरुप्रसन्नगंभीरास्पदपदपद्मेभ्यो नमः ॥
रंभः ॥ भूमिसुपस्थेद्दृढंनइष्ठानमइष्ठानेमः ॥
षिभ्योमंत्रकृद्भ्यो मंत्रपतिभ्योनमोवोऽअस्तुदेवेभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ शिवानः शंतमाभवसुमत्कीकासरस्वतिमाते व्याम
संदृशि॥भुद्रंकर्णेभि०॥१॥शंन इंद्राग्नी०॥२॥स्तु
षेजनंसुव्रतंनव्यसीभिर्गीर्भिर्मित्रावरुणासुम्नयंता॥तन्प्रागमं
तुनइहबंतुसप्तात्रासोवरुणोमित्रोअग्निः॥३॥कयानश्चित्र०
सखा॥कया०वृता०॥३॥कस्त्वासत्यो०वसु॥४॥अभीषुणः०ति
भिः॥३॥स्योनापृथि०प्रथः१॥आवेदंस्तंशकुनेभद्रमावदतु
वीमीसीनःसुमतिंचिकिद्धिनः॥यदुत्पतन्वदस्तिकर्क
रिर्यथाबृहदेमविदथेसुवीरः॥३॥ओषधिधानाकुली
दंतैःपरिष्टतापविः॥सर्वस्येवाचरंथानाचारुमामिहवादये॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दितिवाग्रसः॥३॥वाङ्मेमनसि०॥३॥उदितःशुक्रियंदधे॥तम
हमात्मनिदधेऽनुमामेद्यिंद्रियं॥मयिश्रीमयियशः॥सर्वः
सप्राणःसबलः॥उत्तिष्ठाम्यनुमाधीः॥उत्तिष्ठत्वनुमायंतुदेव
ताः॥अदब्धंचक्षुरितंमनः॥सूर्योज्योतिषांश्रेष्ठादीक्षेमामा
हिंसीः॥३॥तब्रह्मदेव०॥१॥त्वमग्नेव्रतपा०॥३॥मइंनोअधि
वोचतयमनः॥ॐशांतिःशांतिःशांतिः॥ ॥आत्मावाइदमेकएवा
ग्रआसीन्नान्यत्किंचनमिषत्सदक्षतलोकोलुस्रजाइतिस
इमाल्लोकान्सृजतांभोमरीचिर्मरमापोदोंभःपरेणदिवंद्यौः
प्रतिष्ठांतरिक्षंमरीचयःपृथिवीमरोयाअधस्तात्ताआपः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० ११

सईक्षतेमेनु लोका लोकपाला न्नुसृजाइतिसोद्भ्य एव पुरुषंसमु
द्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यतयथाऽऽमु
खाद्वाग्वाचोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणःप्राणाद्वायु
रक्षिणीनिरभिद्येतामक्षीभ्यांचक्षुश्चक्षुषआदित्यःकर्णौनिरभि
द्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्निरभिद्यतत्वचोलोमानिलोम
भ्योषधिवनस्पतयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चं
द्रमानाभिर्निरभिद्यतनाभ्याअपानोपानान्मृत्युःशिश्नंनिरभि
द्यतशिश्नाद्रेतोरेतसआपः॥३॥ताएतादेवताःसृष्टाअस्मिन्मह
त्यर्णवेप्रापतंस्तमशनायितासाभ्यामन्ववार्जत्ताएनमब्रुवन्
नायतनंनःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेतिताभ्यो ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गामानयन्ताअब्रुवन्नवैनोयमलमितिताभ्योरवमानयन्ताअब्रुवन
वैनोयमलमितिताभ्यःपुरुषमानयन्ताअब्रुवन्सुकृतंबतेतिपुरुषो
वावसुकृतंताअब्रवीद्यथायतनंप्रविशतेत्यग्निर्वाग्भूत्वामुखंप्रावि
शद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षुर्भूत्वाक्षिणीप्राविश
द्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयोलोमानिभूत्वा
त्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वाना
भिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रुतामा
वाभ्यामभिप्रजानीहीतितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्येतासु
भागिन्योकरोमीतितस्माद्यस्मैकस्यैचदेवतायैहविर्गृह्यतेभागिन्या
वेवास्यैतामशनापिपासेभवतः॥३॥सईक्षतेमेनुलोकाश्चलोक

पालाश्चान्नमेभ्यः सृजाऽइति सोभ्यतपत्ताभ्योभितप्ताभ्योमूर्तिरजायत ष०
यावैसामूर्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराऽत्यजिघासत्तद्वाचाजिघृक्ष
त्तन्नाशक्नोद्वाचाग्रहीतुंसयदेनद्वाचाग्रहैष्यदभिव्याहरत्यन्नमेवान्नमत्र
प्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयदेनत्प्राणेनाग्र
हैष्यदभिप्राण्यन्नमेवान्नमत्रप्स्यतच्चक्षषाजिघृक्षत्तन्नाशक्नोच्चक्षषाग्र
हीतुंसयदेनच्चक्षुषाग्रहैष्यद्दृष्ट्वान्नमेवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्ना
शक्नोच्छ्रोत्रेणग्रहीतुंसयदेनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वान्नमेवान्नमत्रप्स्यत्तत्त्वचा
जिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयदेनत्त्वचाग्रहैष्यत्स्पृष्ट्वान्नमे
वान्नमत्रप्स्यतन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयदेनन्मनसाग्र
हैष्यत्ध्यात्वान्नमेवान्नमत्रप्स्यत्तद्भिश्नेनाजिघृक्षत्तन्नाशक्नोद्भिश्नेन १२
ग्रहीतुंसयदेनद्भिश्नेनाग्रहैष्यद्विसृज्यान्नमेवान्नमत्रप्स्यत्तदपानेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिघृक्षत्तदावयतेषोन्वस्यग्रहोयद्वायुरन्वायुर्वाएषयद्वायुःसर्ईक्षतक
थन्विदंमद्दतेस्यादितिसर्ईतकतरेणप्रपद्यारतिसर्ईक्षतयदिवाचा
भिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषाहृतंयदिश्रोत्रेणश्रुत
यदित्वचास्पृश्यंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदिशिश्ने
नविसृष्टमथकोहमितिसएतमेवसीमानंविदार्यैतयाद्वारापाप्रपद्यत
सैषाविदितिर्नामद्वास्तदेतनांदनंतस्यत्रयआवसथास्त्रयस्वप्नाःअ
यमावसथोयमावसथइतिसजातोभूतान्यभिव्येख्यत्किमिहान्यंवा
वदिषदितिसएतमेवपुरुषंब्रह्मततममपश्यदिदमदर्शमितीदं ॥
तस्मादिदंदोनामेदंदोहवैनामतमिदंदंसंतमिंद्रइत्याचक्षतेपरो
क्षेणापरोक्षप्रियाइवहिदेवाःपरोक्षप्रियाइवहिदेवाः॥इतिद्वितीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यारण्येचतुर्थोध्यायः॥ ॥ॐअपक्रामंतुगर्भिण्यः॥ॐपुरुषेहवा ष०
अयमादितोगर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजःसंभृत न
मात्मन्येवात्मानंबिभर्त्तितद्यदास्त्रियांसिंचत्यथनज्जनयतितदस्य
प्रथमंजन्मतत्स्त्रियाआत्मभूयंगच्छतियथास्वमंगतथातस्मादेनान
हिनस्तिसाह्येतमात्मानमत्रगतंभावयतिसाभावयित्रीभावयित
व्याभवतितंस्त्रीगर्भंबिभर्तिसोग्रएवकुमारंजन्मनोग्रेधिभावयति स
यत्कुमारंजन्मनोग्रेधिभावयत्यात्मानमेतद्भावयत्येषांलोकानांसंत
त्याएवंसंततानहमेलोकास्तदस्यद्वितीयंजन्मसोस्यायमात्मापुण्ये
भ्यःकर्मभ्यःप्रतिधीयतेथास्यायमितरआत्माकृतकृत्येवयोगते १३
तःमैतिसइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयंजन्मतदुक्तमृषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णा॥ गर्भेनुसंनन्येषामवेदमहंदेवानांजनिमानि विश्वा॥ शतंमाउ
रआयसीररक्षन्नधःश्येनोजवसानि रंहियमिति॥ गर्भएवैतल
यानोवामदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्र
म्यामुष्मिन्त्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभव
त्॥ ४॥ ॥इतिद्वितीयारण्येपंचमोध्यायः॥ यथास्थानंगर्भिण्यः॥
ॐकोमात्मेतिवयमुपास्महेकतरःसआत्मायेनवापश्यतियेनवा
शृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनवा
स्वादुचास्वादुचविजानातियदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञा
नंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिःसंक
ल्पःक्रतुरसुःकामोवशइतिसर्वाण्येवैतानिप्रज्ञानस्यनामधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ० मानिभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपं ष०
१४ चमहाभूतानिपृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानि
क्षुद्रमिश्राणीवबीजानीतराणिचेतराणिचाण्डजानिजारजानि
चस्वेदजानिचाद्रिजानिचाश्वागावःपुरुषाहस्तिनोयत्किंचेदं
प्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेत्र
तिष्ठितंप्रज्ञानेत्रोलोकःप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्म॥सएतेनप्र
ज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्त्स्वर्गेलोकेसर्वान्कामाना
प्त्वामृतःसꣳसमभवत्समभवत्॥५॥ ॥इतिद्वितीयारण्येषष्ठो १४
ध्यायः॥ ॥ॐवाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा विराधी मेऽधि ॥ वेदस्यमआणीस्थ श्रुतं मेमाप्रहासीरनेनाधी
तेनाहोरात्रांत्संदधामृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्ता
रमवत्ववतुमामवतुवक्तारमवतुवक्तारं ॥ ६ ॥ उदितःशुक्रियं० ॥ तत्र
क्षुः० ॥ त्वमग्नेव्रतपा० ॥ वाङ्मेमनसि० ॥ भद्रंनो० ॥ इत्यृक्तरशांतिः ॥ ॥
इतिद्वितीयारण्येसप्तमोध्यायः ॥ इतिद्वितीयारण्येआत्मषट्कस
माप्तं ॥ ॥ ॐ ॥ शांतिपाठःपूर्ववत् ॥ उत्तिष्ठब्रह्म० ॥ अथप्रसंगाद्यति
धर्माः धर्मोब्धिसारे ॥ प्रातरुत्थायब्रह्मणस्मृतइतिजपित्वादंडादि
निमृदंचादायमूत्रपुरीषयोर्गृहस्थचतुर्गुणशौचंकृत्वाचम्यपर्व
द्वर्ज्जीवर्जं ॥ प्रणवेनदंतधावनंकृत्वामृदाबहिःकटिप्रक्षाल्यज्ञ
लेनर्पणवर्जंस्नात्वापुनर्जंघेप्रक्षाल्यवस्त्रादीनिगृहीत्वाप्रणवेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५ प्राणायाममार्जनादि कृत्वा केशवादिनामोंतनामभिस्तर्पयित्वा
भूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्मार्जनस्तर्पयामीति
तर्पयेत्॥अत्रविशेषोमाधवादौविश्वेश्वर्यादौचज्ञेयः॥सूर्योप
स्थानादिकंत्रिकालविष्णुपूजादिकंचसिद्धोक्तंयं॥विधूमेसंन
मुसलेव्यंगारेभुक्तवज्जने॥कालेपराण्हेभ्यिष्ठनित्यंभिक्षाय
तिश्चरेत्॥अत्रभिक्षाभेदाःग्रंथांतरेज्ञेयाः॥अत्रविविदिषोर्दंडि
नःमाधुकरीमुख्यादंडवस्त्रादिपरिग्रहरहितस्यैतुकरपात्रमु ३५
रव्यं॥अन्येपक्षाअशक्तविषयाः॥तत्रमाधुकरीपक्षेहडादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीत्वापंचभ्यःसप्तभ्योवागृहेभ्योभिक्षांयाचित्वानंप्रोक्ष्यभूःस्व
धानमइत्यादिव्यस्तसमस्तव्याहृतिभिःसूर्यादिदेवेभ्योभूतेभ्यश्च
भूमौक्षिप्त्वारोदमन्नंनिष्पुनिवेदितभुंजीत॥चंडीविनायकादिनै
वेद्यंनभुंजीत॥भुक्त्वाचम्यपोउशब्दंप्राणायामान्कुर्यादितिसंक्षे
पः॥यस्तुतिहस्तेजलंदद्यात्भिक्षांदद्यात्सुनिर्जलं॥भैक्ष्यंपर्वतमा
नंस्यात्तज्जलंसागरोपमं॥एकरात्रंवसेद्ग्रामेनगरेपंचरात्रकं॥
वर्षाभ्योन्यत्रवर्षासुमासांस्तूचतुरोवसेत्॥आषाढीमासमारभ्य
स्याद्यतीनांसंयतात्मनां॥महीक्षेत्रपविष्टानांविहारस्तुनविद्यते॥
भिक्षाटनंजपस्नानेध्यानंशौचंसुरार्चनं॥कर्तव्यानिषडेतानिस
र्वथान्दपदउक्तं॥मंचकःशुक्लवस्त्रंचस्त्रीकथात्यलोभेवच॥दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासापश्चयानंचयतीनांपतनानिवट्॥वृथाजल्पंवृथालोभंसंच पात्र
यंशिष्यसंग्रहं॥हव्यंकव्यंतथान्नंचवर्जयेद्वसदायतिः॥यतिपात्रा
णिमृद्वेणुदारवेलाबुमयानिच॥नतीर्थवासीनित्यस्याद्नोपवासपरा
यतिः॥नचाध्यनशीलःस्यान्नव्याख्यानपरोभवत्॥इत्तद्दंडाथर्भिं
नपरं॥इतिसंक्षेपतोयतिधर्माः॥अन्येपिमाधवीयमिताक्षरादौ
द्रष्टव्याः॥तांबूलाभ्यंजनंचैवकांस्यपात्रंचभोजनं॥यतिश्चत्रिवि ध
वाचैववर्जयेद्वंदनादिकं॥॥श्रुतिस्मृतिपुराणानामालयंकरु
णालयं॥नमामिभगवत्पादंशंकरंलोकशंकरं॥शंकरंशंकरा १६
चार्यंकेशवंबादरायणं॥सूत्रभाष्यकृतोवंदेभगवंतौपुनःपुनः॥
॥ॐब्रह्मणस्तुत्वमुरयंतासूक्तस्यबोधितनयंहजिन्व॥वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खंतद्वृंयदवंतिहेवाबृहद्वदेमविदथेसुवीराः॥ ॥आदोशिरस्त
थागत्वेचोचुवुकंमुखमंडले॥ गलुरजानेग्रीवायांयतिक्षौरविधी
यते॥ पादौप्रक्षाल्यात्मन्यमाणानायम्यक्षौरविधिंकारयेत्। इति
संकल्प्य॥ षडंगन्यासंकृत्वा॥ क्षुरंद्वादशवारंमृदाप्रक्षाल्यशनापि
तंभोक्ष्यवपनंकुर्यात्॥ वोडशगंडूषान्कृत्वास्नायात्॥ ॥छु॥॥

॥श्रीशिवायनमः॥ ॐनमःश्रीशिवायशांतमोपनिष्कलायेशांत
सकलोपसंहारनिष्कलाय नखमोकिकेशेमश्रुकुक्षरोमदुर्नीतेन ३७
देवाद्यानिद्रोहंमेकृतेनमेकृतानिक्षेत्रेनमेकृतेसर्वेषांत्वसंसर्वे
देवाद्योनाथःसर्वेदोलकोनिष्फलसर्वेदमयोहारः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निश्चलं १ निर्भयं २ शांतं ३ निराकारं ४ निराधारं ५ सर्वाधारं ६ सत्य
कामं ७ निर्ममं ८ सर्वमनहारातीतं ९ स्वानुभवैकवेद्यं ॥१०॥ देहेंद्रिय
मनोबुध्यादिदृश्यसाक्षिभूतं ॥११॥ सर्वविभासकं १२ निराभासकं १३
स्वाविद्याध्यस्तगुणदोषातीतं ॥१४॥ सर्वनिष्कलमद्वंद्वं ॥ सदेकरसं ॥१६॥
नानेतिसर्वद्वैतनिरासावधिभूतं ॥१७॥ निर्विकल्पसमाध्यनुभव
निरस्तिताखिलमायिकभ्रमभेदं ॥१८॥ सर्वत्रस्वर्गसिद्धसाधनस्था
कसंदं ॥१९॥ मनोवाग्गोचरं ॥२०॥ श्रुतियुक्त्यनुभवैकसत्य
प्राणत्रयवेद्यं ॥२१॥ ॥श्रीसदाशिवायनमः॥

श्रीशिवायनमः॥ श्रीसदाशिवायनमः

श्रीसदाशिवायनमः॥

KKSU LIBRARY
RAMTEK
441 106
M-1503
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.06.20 14:53
,TRANSFERRED=2020/06/25 at 15:01:00
,PAGES=34
,TYPE=STD
,NAME=S0003227
,Book Name=M-1503-BRAHAMCHINTNIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection